नैव रूपस्य मङ्गलं भवतीति भावः।) लताविशेषः। गन्धभादालिया इति भाषा॥ इति शब्दचन्द्रिका॥ (गुण-पर्य्यायावस्थाः प्रसारणीशब्दे ज्ञातव्याः॥)

गन्धभाण्डः, पुं, (गन्धस्य भाण्डमिव।) गर्द्दभाण्डवृक्षः। इति शब्दरत्नावली॥ (पर्य्यायोऽस्य यथा,
"नन्दिवृक्षस्ताम्रपाकी फलपाकी च पीतकः।
गन्धभाण्डो गन्धमुण्डो द्वितीयः चिप्रपाक्यसौ॥"
इति वैद्यकरत्नमाला॥)

गन्धमांसी, स्त्री (गन्धसारा मांसी।) जटामांसीभेदः। तत्पर्य्यायः। केशी २ भूतजटा ३ पिशाची ४ पूतना ५ भूतकेशी ६ लोमशा ७ जटाला ८ लघुमांसी ९। अस्या गुणाः। तिक्तत्वम्। शीतत्वम्। कफकण्ठामयरक्तपित्तविषभूतज्वरनाशित्वम्। वर्ण्यत्वञ्च। इति राजनिर्घण्टः॥ (जटामांसीशब्देऽस्या विवृतिर्बोद्धव्या॥)

गन्धमाता, स्त्री, (गन्धस्य मातेव। गन्धगुणप्राधान्यात् तथात्वम्। यथा, मनौ। १। ७८।
"ज्योतिषश्च विकुर्व्वाणादापो रसगुणाः स्मृताः।
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः॥")
पृथिवी। इति हेमचन्द्रः। ४। २॥

गन्धमादनं, क्ली पुं, (गन्धैः आमोदपरिसम्भूतौषधीविशेषसौरभैः मादयति सन्निहितस्थानिति। मद्+णिच्+कर्त्तरि ल्युः। मादतेऽनेन इति णिच् लुट् वा।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३॥ अयं इलावृतभद्राश्ववर्षयोः सीमापर्व्वतः। अस्य विस्तारः नीलनिषधपर्व्वतपर्य्यन्तः। इति श्रीभागवतम्॥ (तथा च महाभारते। २। १०। ३०।
"मलयो दर्द्दरश्चैव महेन्द्रो गन्धमादनः।
इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्व्वतौ॥"
अस्य गिरेरधिष्ठातृदेवोऽपि एतन्नाम्ना विश्रुतः। यथा, तत्रैवाध्याये। २८ श्लोके।
"हुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम्।
राक्षसाधिपतिश्चैव महेन्द्रो गन्धमादनः॥"
अयमेव पर्व्वतो भगवत्याः पीठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ५६।
"प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने॥")

गन्धमादनः, पुं, (गन्धेन पुष्पसौरभेण मादयत्यात्मानमिति। गन्ध+मद्+णिच्+ल्युः। यद्वा गन्धेन मादयति इति। मद्+स्वार्थे णिच्+ल्युः।) भ्रमरः। वानरविशेषः। (यथा, रामायणे ४। २५। ३३।
"गयो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवांस्तथा॥")
गन्धकः। इति मेदिनी। ने। २३४॥

गन्धमादनी, स्त्री, (गन्धेन माद्यतेऽनया। मद्+णिच्+करणे ल्युट् ततो ङीप्।) मदिरा। इति त्रिकाण्डशेषः॥ बन्दाकः। चौड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमादनी, स्त्री, (गन्धेन मादयतीति। मद्+णिच्+णिनिः।) लाक्षा। मुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमार्ज्जारः, पुं, (गन्धेन गात्रगन्धेन युक्तः गन्धप्रधानो वा मार्ज्जारः।) खट्टाशः। इति जटाधरः॥

गन्धमालती, स्त्री, (गन्धेन मालती इव।) गन्धद्रव्यविशेषः। सा तु गुणैर्गन्धकोकिलातुल्या। (यथा, भावप्रकाशे।
"गन्धकोकिलया तुल्या विज्ञेया गन्धमालती॥")

गन्धमालिनी, स्त्री, (गन्धानां गन्धस्य वा माला समूहः अस्त्यस्यामस्या वा इति। अस्त्यर्थे इनिः ततो ङीप्।) मुरानामगन्धद्रव्यम्। इति जटाधरः॥

गन्धमुण्डः, पुं, (गन्धं अपरगन्धं मुण्डयति मर्द्दयति स्वगन्धेनेति शेषः। मुड़ि मर्द्दने+णिच्+अण्। यद्वा गन्धेन स्वगन्धेन अन्यं दुष्टगन्धं मार्ष्टि शोधयतीति। मुड़ि शोधने+णिच्+अच्।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। नन्दीवृक्षः १ ताम्रपाकी ३ फलपाकी ४ पीतकः ५ गर्द्दभाण्डः ६ चिप्रपाकी ७। इति वैद्यकम्॥

गन्धमूलः, पुं, (गन्धसारं मूलमस्य।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः॥

गन्धमूलकः, पुं, (गन्धमूल+संज्ञायां कन्।) शटी। इति शब्दरत्नावली॥

गन्धमूला, स्त्री, (गन्धसारं गन्धप्रधानं वा मूलमस्याः।) शल्लकी। शटी। इति राजनिर्घण्टः॥

गन्धमूलिका, स्त्री, (गन्धमूली+संज्ञायां कन्। पूर्व्वह्रस्वः। यद्वा गन्धप्रधानं मूलमस्य इति कप् ततष्टाप् कापि अत इत्वम्।) माकन्दी। शटी। इति राजनिर्घण्टः॥

गन्धमूली, स्त्री, (गन्धमूल+स्त्रियां ङीप्।) शटी। इत्यमरः। २। ४। १४५॥

गन्धमूषिकः, पुं स्त्री, (गन्धप्रधानो मूषिकः।) छुछुन्दरी। इति त्रिकाण्डशेषः॥

गन्धमूषी, स्त्री, (गन्धा दुर्गन्धप्रधाना मूषी।) छुछुन्दरी। इति हेमचन्द्रः। ४। ३६८॥

गन्धमृगः, पुं, (गन्धाढ्यः गन्धेन युक्तो वा मृगः।) खट्टाशः। इति शब्दमाला॥ (खट्टाशशब्देऽस्य गुणादयो व्याख्याताः॥)

गन्धमैथुनः, पुं, (गन्धेन वासितायाः ऋतुमत्या गोर्योनिघ्राणेन मैथुनोद्योगः स्पृहा वा यस्य।) वृषः। इति जटाधरः॥

गन्धमोदनः, पुं, (गन्धेन आमोदवगन्धेन मोदयतीति। मुद्+णिच्+ल्युः।) गन्धकः। इति राजनिर्घण्टः॥

गन्धमोहिनी, स्त्री, (गन्धेन स्वावयवस्थगन्धेनैलर्थः मोहयति सन्निकर्षस्थानिति। मुह्+णिच्+णिनिः ङीप् च।) चम्पककली। इति राजनिर्घण्टः॥

गन्धरसः, पुं, (गन्धाढ्यः गन्धान्वितो वा रसोऽस्य।) उपधातुविशेषः। फुलसत इति ख्यातः। तत्पर्य्यायः। वोलः २ प्राणः ३ पिण्डः ४ गोपः ५ रसः ६। इत्यमरः। २। ६। १०४॥ रसगन्धः ७ गोसः ८ पिण्डगोसः ९ शशः १० गोसशशः ११। इति तट्टीका॥ गान्धारम् १२ मधिवर्द्धनम् १३। इति त्रिकाण्डशेषः॥ गोपरसः १४ वोलजः १५ गोपकः १६। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। २७। ११।
"न्यायोपेतं ब्राह्मणेभ्यो यदन्नं
श्रद्धापूतं गन्धरसोपपन्नम्॥")

गन्धरसाङ्गकः, पुं (गन्धरसो अङ्गे यस्य इति कप्।) श्रीवेष्टनामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

गन्धराजं, क्ली, (गन्धेन राजते इति। राज्+अच्।) चन्दनम्। जवादिनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ स्वनामख्यातशुक्लवर्णपुष्पञ्च॥

गन्धराजः, पुं, (गन्धानां गन्धसाराणां राजा। "राजाहस्सखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) मुद्गरवृक्षः। कणगुग्गुलुः। इति राजनिर्घण्टः॥ स्वनामख्यातपुष्पवृक्षः। तस्य पत्रं पनसवृक्षस्य चुद्रदलवत्। पुष्पञ्च सुगन्धिश्वेतवर्णं उपर्य्यधोद्वादशदलं षट्केशरमध्यं भवति वसन्तवर्षाकाले प्रस्फुटति च। तस्य शाखारोपणे वृक्षो जायते। इति लोकप्रसिद्धम्॥ गन्धश्रेष्ठश्च॥

गन्धराजी, स्त्री, (गन्धराज+स्त्रियां ङीप्।) नखनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

गन्धर्व्वः, पुं, (गन्धं सङ्गीतवाद्यादिजनितप्रमोदं अर्व्वति प्राप्नोतीति। अर्व्व गतौ+अण्। शकन्ध्वादित्वात् अलोपे साधुः।) स्वर्गगायकः। स तु देवयोनिः। तत्पर्य्यायः। गातुः २ दिव्यगायनः ३। तद्भेदा यथा,—
"हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा।
गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः॥"
इति जटाधरः॥ *॥
तेषु एकादश गणा यथा,—
"अभ्राजोऽङ्गारिवम्भारी सूर्य्यवर्चास्तथा कृधुः।
हस्तः सुहस्तः स्वाचैव मूर्द्धन्वांश्च महामनाः।
विश्वावसुः कृशानुश्च गन्धर्व्वैकादशा गणाः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥
(असौ देवमर्त्त्यभेदेन गानधर्म्मिगन्धर्व्वोऽपि द्विविधः। यथाह शब्दार्थचिन्तामणिः।
"अस्मिन् कल्पे मनुष्यः सन् पुण्यपाकविशेषतः।
गन्धर्व्वत्वं समापन्नो मर्त्त्यगन्धर्व्व उच्यते॥
पूर्व्वकल्पकृतात् पुण्यात् कल्पादावेव चेद् भवेत्।
गन्धर्व्वत्वं तादृशोऽत्र देवगन्धर्व्व उच्यते॥"
तत्र दिव्यगन्धर्व्वो यथा, ऋग्वेदे। १०। १३९। ५।
"विश्वावसुरभि तन्नो गृणातु
दिव्यो गन्धर्व्वो रजसो विमानः॥"
तथाच महाभारते। ३। १६१। २६।
"स तमास्थाय भगवान् राजराजो महारथम्।
प्रययौ देवगन्धर्व्वैः स्तूयमानो महाद्युतिः॥"
मर्त्त्यगन्धर्व्वः। यथा, रामायणे। १। ४। ११।
"भ्रातरौ स्वरसम्पन्नौ गन्धर्व्वाविव रूपिणौ॥")
गुह्यकलोकोपरि विद्याधरलोकस्याधो गन्धर्व्वलोकः। यथा,—